योगवासिष्ठः/प्रकरणम् २ (मुमुक्षुव्यवहारप्रकरणम्)/सर्गः ०९

नवमः सर्गः ९

श्रीराम उवाच ।

भगवन्तत्वधर्मज्ञ प्रतिष्ठामलमागतम् ।

यल्लोके तद्वद ब्रह्मन्दैव नाम किमुच्यते ।। १

श्रीवसिष्ठ उवाच ।

पौरुषं सर्वकार्याणां कर्तृ राघव नेतरत् ।

फलभोक्तृ च सर्वत्र न दैवं तत्र कारणम् ।। २

दैवं न किंचित्कुरुते न भुङ्क्ते न च विद्यते ।

न दृश्यते नाद्रियते केवलं कल्पनेदृशी ।। ३

सिद्धस्य पौरुषेणेह फलस्य फलशालिना ।

शुभाशुभार्थसंपत्तिर्दैवशब्देन कथ्यते ।। ४

पौरुषोपनता नित्यमिष्टानिष्टस्य वस्तुनः ।

प्राप्तिरिष्टाप्यनिष्टा वा दैवशब्देन कथ्यते ।। ५

भावी त्ववश्यमेवार्थः पुरुऽषार्थैकसाधनः ।

यः सोऽस्मिँल्लोकसंघाते दैवशब्देन कथ्यते ।। ६

ननु राघव लोकस्य कस्यचित्किंचिदेव हि ।

दैवमाकाशरूपं हि करोति न करोति च ।। ७

पुरुषार्थस्य सिद्धस्य शुभाशुभफलोदये ।

इदमित्थं स्थितमिति योक्तिस्तद्दैवमुच्यते ।। ८

इत्थं ममाभवद्बुद्धिरितिथ मे निश्चयो ह्यभूत् ।

इति कर्मफलप्राप्तौ योक्तिस्तद्दैवमुच्यते ।। ९

इष्टानिष्टफलप्राप्ताविदमित्यस्य वाचकम् ।

आश्वासनामात्रवचो दैवमित्येव कथ्यते ।। १०

श्रीराम उवाच ।

भगवन्सर्वधर्मज्ञ यत्प्राक्कर्मोपसंचितम् ।

तद्दैव दैवमित्युक्तमपमृष्ट कथं त्वया ।। ११

श्रीवसिष्ठ उवाच ।।

साधु राघव जानासि शृणु वक्ष्यामि तेऽखिलम् ।

दैवं नास्तीति ते येन स्थिरा बुद्धिर्भविष्यति ।। १२

या मनोवासना पूर्व बभूव किल भूरिशः ।

सैवेयं कर्मभावेन नृणां परिणतिं गता ।। १३

जन्तुर्यद्वासनो राम तत्कर्ता भवति क्षणात् ।

अन्यकर्मान्यभावश्चेत्येतन्नैवोपपद्यते ।। १४

ग्रामगो ग्राममाप्नोति पत्तनार्थी च पत्तनम् ।

यो यो यद्वासनस्तत्र स स प्रयतते सदा ।। १५

यदेव तीव्रसंवेगाद्दृढं कर्म कृतं पुरा ।

तदेव दैवशब्देन पर्यायेणेह कथ्यते ।। १६

एवं कर्मस्थकर्माणि कर्मप्रौढा स्ववासना ।

वासना मनसो नान्या मनो हि पुरुषः स्मृतः ।। १७

यदैवं तानि कर्माणि कर्म साधो मनो हि तत् ।

मनो हि षुरुषस्तस्माद्दैव नास्तीति निश्चयः ।। १८

एष एव मनोजन्तुर्यद्यत्प्रयतते हितम् ।

कृतं तत्तदवाप्नोति स्वत एव हि दैवतः ।। १९

मनश्चित्तं वासना च कर्म दैवं च निश्चयः ।

राम दुर्निश्चयस्यैताः संज्ञाः सद्भिरुदाहृताः ।। २०

एवंनामा हि पुरुषो दृढभावनया यथा ।

नित्यं प्रयतते राम फलमाप्नोत्यलं तथा ।। २१

एवं पुरुषकारेण सर्वमेव रघूद्वह ।

प्राप्यते नेतरेणेह तस्मात्स शुभदोऽस्तु ते ।। २२

श्रीराम उवाच ।

प्राक्तनं वासनाजालं नियोजयति मां यथा ।

मुने तथैव तिष्ठामि कृपणः किं करोम्यहम् ।। २३

श्रीवसिष्ठ उवाच ।

अत एव हि राम त्वं श्रेयः प्राप्नोषि शाश्वतम् ।

स्वप्रयत्नोपनीतेन पौरुषेणैव नान्यथा ।। २४

द्विविधो वासनाव्यूहः शुभश्चैवाशुभश्च ते ।

प्राक्तनो विद्यते राम द्वयोरेकतरोऽथ वा ।।

वासनौघेन शुद्धेन तत्र चेदद्य नीयसे ।

तत्क्रमेण शुभेनैव पदप्राप्स्यसि शाश्वतम् ।। २६

अथ चेदशुभो भावस्त्वां योजयति संकटे ।

प्राक्तनस्तदसौ यत्नाज्जेतव्यो भवता बलात् ।। २७

प्राज्ञश्चेतनमात्रस्त्वं न देहस्त्वं जडात्मकः ।

अन्येन चेतसा तत्ते चेत्यत्वं क्वेव विद्यते ।। २८

अन्यस्त्वां चेतयति चेत्तं चेतयति कोऽपरः ।

क इमं चेतयेत्तस्मादनवस्था न वास्तवी ।। २९

शुभाशुभाभ्यां मार्गाभ्यां वहन्ती वासनासरित् ।

पौरुषेण प्रयत्नेन योजनीया शुभे पथि ।। ३०

अशुभेषु समाविष्टं शुभेष्वेवावतारय ।

स्वं मनः पुरुषार्थेन बलेन बलिनां वर ।। ३१

अशुभाच्चालितं याति शुभं तस्मादपीतरत् ।

जन्तोश्चित्तं तु शुवित्तन्मुहूश्चतूयेद्गलात् ।। ३२

समता सांत्वनेनाशु न द्रागिति शनेशनेः ।

पौरुषेणैव यत्नेन पालयेच्चित्तबालकम् ।। ३३

वासनौघस्त्वया पूर्वमभ्यासेन घनीकृतः ।

शुभो वाप्यशुभो वापि शुभमद्य घनीकुरु ।। ३४

प्रागभ्यासवशाद्याता यदा ते वासनोदयम् ।

तदाभ्यासस्य साफल्यं विद्धि त्वमरिमर्दन ।। ३५

इदानीमपि ते याति घनतां वासनानघ ।

अभ्यासवशतस्तस्माच्छुभाभ्यासमुपाहर ।। ३६

पूर्वे चेद्धनतां याता नाभ्यासात्तव वासना ।

वर्धिष्यते तु नेदानीमपि तात सुखी भव ।। ३७

संदिग्धायामपि भृशं शुभामेव समाहर ।

अस्यां तु वासनावृद्धौ शुभाद्दोषो न कश्चन ।। ३८

यद्यदभ्यस्यते लोके तन्मयेनैव भूयते ।

इत्याकुमारं प्राज्ञेषु दृष्टं संदेहवजितम् ।। ३९

यूभासना युक्तस्तदत्र भव भूतये ।

परं पोरुषमाश्रित्य विजित्येन्द्रियपञ्चकम् ।। ४०

अव्युत्पन्नमना यावद्भवानज्ञाततत्पदः ।

गुरुशास्त्रप्रमाणैस्तु निर्णीतं तावदाचर ।। ४१

ततः पक्वकषायेण नूनं विज्ञातवस्तुना ।

शुभोप्यसौत्वया त्याज्यो वासनौघो निराधिना ।। ४२

यदतिसुभगमार्यसेवितं

च्छुभमनुसृत्य मनोज्ञभावबुद्ध्या ।

अधिगमय पदं सदा विशोक

तदनु तदप्यवमुच्य साधु तिष्ठ ।। ४३

इत्यार्षे श्रीवासिष्ठमहारामायणे वाल्मीकीये मुमुक्षुव्यवहारप्रकरणे कर्मविचारो नाम नवमः सर्गः ।। ९ ।।